१८ पत्र

विषयतावादार्थः

१५७९

ज्ञानविषयाभ्यामिति शेषः १

घटादौ

श्रीगणेशाय नमः विषयता च स्वरूपसंबंधविशेषो ज्ञानादीनां विषयैर्नत्वतिरिक्ता मानाभा
वादिति प्राञ्चः तदसत् तथाहि विषयताया ज्ञानस्वरूपत्वे घटवद्भूतलमित्यादिज्ञान
घटादिना संयोगः २ निरूपितानां घटभूतलादिवृत्तिविषयतानामभेदापत्त्या तादृशज्ञानानंतरं घटप्रकारक
ज्ञानवानहमिति प्रतीतिवद्भूतलप्रकारकज्ञानवानहमिति प्रत्ययप्रसंगः घटनिष्ठप्रका
रतात्मकतज्ज्ञानरूपविषयताया भूतलादिवृत्तित्वात् एवं घटपटाविति समूहालम्ब राम
नधियो भ्रमत्वापत्तिश्च घटनिष्ठतज्ज्ञानरूपविशेष्यताया पटनिष्ठघटत्वप्रकारता १
निरूपिततज्ज्ञानरूपविशेष्यताया भिन्नतया तादृशज्ञानस्य घटत्वप्रकारतानिरूपितपट

निष्ठविशेष्यताशालित्वात् विषयस्वरूपत्वे च घटभूतलसंयोगाद्याकारकसमूहाल
म्बनीयघटादिनिष्ठतत्स्वरूपविषयतानां घटत्वभूतलत्वादिविशिष्टज्ञाननिरूपि
तघटादिनिष्ठविषयतानां च तत्स्वरूपत्वेनाविलक्षणतया समूहालम्बनविशिष्टबु
द्ध्योर्वैलक्षण्यानुपपत्तेः न च विशिष्टज्ञाने संवंधसंवंधिनोरधिको भासते न तु समूहालं
बने इत्यत एव तयोर्वैलक्षण्यमुपपत्स्यत इति वाच्यम् संवंधसंवंधिमादायापि समूहा
लंवनसंभवात् तस्माज्ज्ञानविषयाभ्यामतिरिक्तमेव विषयत्वमित्यनन्यगत्या स्वी
करणीयम् तच्चाश्रयतया विषये ज्ञाने च निरूपकत्वसंवंधेन वर्तत इति एतेन वि
अतिरिक्तमिति शेषः १ षयित्वमपि व्याख्यातम् न च विषयताप्रतियोगित्वमेव विषयित्वमस्तु किं तस्याति

ज्ञाने विषयित्वमाश्रयतया विषये निरूपितत्वसंवंधेन वर्तते १

घटभूतलसंयोगप्रतियोगित्वानुयोगित्वानीति ४

विषयभेदेनविषयत्वादिभेदास्वीकारे ३

विष-वा
२
2

रिक्तत्वस्वीकारेगौरवं विषयित्वमेवातिरिक्तंतत्रानियोगित्वमेवविषयत्वमित्य
स्यापिवक्तुंशक्यत्वात् तस्माद्विनिगमनाविरहादुभयमेवातिरिक्तं विषयत्वादिकंतुविष
यभेदेनभिद्यते अन्यथाघटवद्भूतलमित्यादिज्ञानीयघटभूतलादिविषयतानांघटप
टावित्यादिज्ञानीयघटपटादिविषयतानांचाभेदप्रसंगेनपूर्वोक्तानुपपत्तितादवस्थ्यात्
नतुज्ञानव्यक्तिभेदेनापितद्भेदः मानाभावात् तत्रादिविषयम् विषयत्वानिरूपितंतन्नि
रूपितंचेति तत्रनिर्विकल्पकनिरूपितविषयताविषयत्वानिरूपिता निर्विकल्पकीय
घटत्वादिविषयतायाघटादिविषयतानिरूपितत्वेमानाभावात् विशिष्टबुद्धिविषय
ताचविषयत्वनिरूपिता प्रकारताविशेष्यतासंसर्गतारूपाणांतासांपरस्परंनिरूपनिरू

भूतलप्रकारकज्ञान
वानहमितिप्रतीतिःस्या
त् घटपटावितिज्ञानास्म
अम राम वंवस्थात् ४
२

विषयत्वनिरूपितविषयतानंगीकारे १

पकभावसत्वात् अन्यथा घटवद्भूतलं पर्वतो वह्निमानित्याद्याकारकज्ञानविषयत्वाद्घ
टवान्पर्वतो वह्निमद्भूतलमित्याकारकज्ञानविषयतायाश्च वैलक्षण्यापसंगात् मन्मते
प्रथमे घटप्रकारत्वभूतलविशेष्यत्वयोर्वह्निप्रकारत्वपर्वतविशेष्यत्वयोश्च परस्परं निरू त्वे
प्यनिरूपकभावः द्वितीये च वह्निप्रकारत्वभूतलविशेष्यत्वयोर्घटप्रकारत्वपर्वतविशे त्व
ष्यत्वयोरिति वैलक्षण्योपपत्तिः एवं घटवद्भूतलं घटवान्पर्वत इत्याद्याकारकसमूहा
लंबने घटादिरूपैकैकप्रकारतानिष्ठप्रकारताया भूतलपर्वतादिविशेष्यभेदेन घट भेदो बोध्यः २
वद्भूतलं पटवच्चेत्यादिसमूहालंबने च भूतलादेरेकैकविशेष्यनिष्ठविशेष्यताया अ
पि घटपटादिप्रकारभेदेन भेदो बोध्यः उभयविशेष्यतानिरूपितत्वस्यैकप्रकारताया

घटवद्भूतलं घटवान्पर्वत इत्याकारकमेकं ज्ञानं घटवद्भूतलं पटवच्चेत्याकारकमपरं ज्ञानम् २ भूतल विशेष्यतापर्वतविशेष्यतानिरू
पितघटनिष्ठाभ्यां ३ घटप्रकारतापटप्रकारता ३

विष॰वा ३ 3

द्वयप्रकारतानिरूपितत्वस्यैकविशेष्यतायां स्वीकारे तादृशसमूहालंबनादावतिरि
क्तविषयताकल्पनप्रसंगात् मन्मते घटवद्भूतलमित्याद्याकारकप्रत्येकज्ञाननिरूपिताभ्यां
प्रत्येकविशेष्यतानिरूपितप्रकारताभ्यां प्रत्येकप्रकारतानिरूपितविशेष्यताभ्यामेवोपपत्तेः स भूतलनिष्ठाभ्यां ३
मूहालंबने प्रकारताभेदेन विशेष्यताया अभेदे घटवद्भूतलं पटवच्चेत्यादिसमूहालंबना
देकत्र द्वयमिति रीत्या एकधर्मिणि नानाधर्मवैशिष्ट्यावगाहि घटवद्भूतलं पटवदित्यादि
ज्ञानस्यावैलक्षण्यप्रसंगः मन्मते तु समूहालंबने प्रकारभेदेन विशेष्यताभेदो न तु एकत्र द्वय ना याम
मिति रीत्या तादृशबोधे इति समूहालंबनात्तस्य वैलक्षण्योपपत्तिरिति विशेष्यत्वं प्रकारत्वं ३
चद्विविधम् किंचिद्धर्मावच्छिन्नं निरवच्छिन्नं च तत्र किंचिद्धर्मावच्छिन्ना विशेष्यता

घटप्रकारतानिरूपिता या विशेष्यता तच्छालि पटप्रकारतानिरूपिता या च विशेष्यता तच्छालि च भूतलम् ४ घटप्रकारतानिरूपिता पटप्र
कारतानिरूपिता च या एका विशेष्यता तच्छालि भूतलम् ४

भूतलत्वघटत्ववद्भूतलमिति ज्ञाना
भूतले घटवदिति ज्ञाने १ इतिरोधः ३

भूतलत्वाद्येक विशेषणविशिष्ट[भूतले]घटादिरूपापरधर्म्मवैशिष्ट्यावगाहिज्ञाने तत्र घटादि
प्रकारतानि[निष्ठ]रूपितभूतलादिविशेष्यताया भूतलत्वाद्यवच्छिन्नत्वात् अन्यथा केवलभे
घटवद्भूतलमिति ३ कत्वद्वयमिति रीत्या उभयवैशिष्ट्यावगाहिनो भूतलं घटवदित्यादिज्ञानस्यैव लक्षणानु
पपत्तेः किंचिद्धर्म्मावच्छिन्नप्रकारताविशिष्टनिरूपितवैशिष्ट्यावगाहि घटवदित्या
घटवदि तिज्ञाने ४ दिज्ञाने तत्र घटादिप्रकारताया घटत्वाद्यवच्छिन्नत्वात् अन्यथा केवले विशेष्ये विशे
षणां तत्र च विशेषणांतरमित्येवंरीत्या घटघटत्वाद्यवगाहिनस्तथाविधज्ञानादिविशिष्ट
वैशिष्ट्यबोधस्यैव लक्षणानुपपत्तिः प्रपंचितं चेदमधिकमन्यत्र [घट] तदंशे विशे[illegible]णता
घटत्वस्यैव १ पन्नस्यैव तन्नि[घट]ष्ठविषयतावच्छेदकमिति तु बोध्यम् [घटत्व] तद्धर्म्मावच्छिन्नविषयता च

किंचिद्धर्म्मावच्छिन्न
विशेष्यत्वानंगीकारे २

किंचिद्धर्म्मावच्छिन्न
प्रकारतानंगीकारे ४
घटत्वविशिष्टघटव
द्भूतलमितिज्ञानस्य ३

घटनिष्ठप्रकारतानि
रूपितघटत्वं १

घटनिष्ठप्रकारतायाः १ तथात्वे घटत्वनिष्ठप्रकारतानिरूपितत्वे १ तद्धर्मावच्छिन्नविषयतायास्तद्धर्मप्रकारतानिरूपितत्वानंगीकारे १

विष॰वा
४

५

न तद्धर्मप्रकारतानिरूपितात्तस्यास्तथात्वे मानाभावात् नैवं घटवद्भूतलमित्यादि
ज्ञानानां भूतलत्वादिप्रकारतानिरूपितविशेष्यताशालित्वानुपपत्तिरिति वाच्यम्
केवलमेकत्र द्वयमिति रीत्या भूतलत्वघटवैशिष्ट्यावगाहिज्ञानीयभूतलत्वाद्यनवच्छि (विशेष्यता २)
न्नभूतलत्वादिप्रकारतानिरूपितविशेष्यतानियामकसामग्र्या अपि तादृशविशिष्ट
वैशिष्ट्यबोधकाले सत्त्वात् तस्य तादृशविषयताशालित्वस्यावश्यकत्वात् तत एव तथा
त्वोपपत्तेः वस्तुतस्तु विशिष्टवैशिष्ट्यबोधविचारे निरवच्छिन्नविषयत्वादीनामखिल राम
विशिष्टवैशिष्ट्यबोधसाधारण्यस्य खंडितत्वात् तादृशविशेष्यताश्रयबोधस्य भूतल ४

त्वादिप्रकारतानिरूपितविशेष्यताशालित्वोपपत्तये भूतलत्वाद्यवच्छिन्नवि
शेष्यताया एव तत्प्रकारतानिरूपितत्वं स्वीकरणीयम् ॥ अथैवं तादृशज्ञानसम्भू
तलत्वप्रकारतानिरूपितभूतलत्वावच्छिन्नविशेष्यताशालित्वाद्भूतलत्वादि
विशिष्टे भूतलत्वादि वैशिष्ट्यावगाहिनो भूतलं भूतलमित्याकारकज्ञानाद्भूतलं
घटवदित्याकारकज्ञानस्य वैलक्षण्यानुपपत्तिस्तादृशज्ञानानन्तरं भूतलत्वविशि
ष्टे भूतलत्ववैशिष्ट्यावगाहिस्मरणापत्तिरिति चेन्न घटवद्भूतलमित्याकारका
रकज्ञानीयभूतलत्वावच्छिन्नविशेष्यताया भूतलत्वप्रकारतानिरूप्यत्वेपि तस्या

विश्व·वा॰
५

भूतलत्वावच्छिन्नत्वविशिष्टविशेष्यतात्वेन न तन्निरूपितत्वं किंतु भूतलत्वाव-
च्छिन्नविशेष्यतात्वेन भूतलत्वनिष्ठप्रकारतानिरूपितत्वं भूतले भूतलमित्यादौ
तु भूतलत्वावच्छिन्नत्वविशिष्टविशेष्यतात्वेनैव भूतलत्वप्रकारतानिरूपितत्वमि
त्यभ्युपगमेन तद्वैलक्षण्योपपत्तेः अवच्छेदकत्वमपि द्विविधं सावच्छिन्नं निरवच्छि
न्नं च तत्रावच्छिन्नमवच्छेदकत्वं जातिमद्घटवदित्यादौ तत्र भूतलत्वादिनिष्ठवि-
शेष्यतावच्छेदकताया जातित्वाद्यवच्छिन्नत्वात् भूतलं घटवदित्यादौ च भूतलत्वा
दिनिष्ठविशेष्यतावच्छेदकत्वादिकं निरवच्छिन्नमिति एवमवच्छेदकतानिरू

राम
५

पितावच्छेदकत्वादिकमपि व्याख्यातम्‌ अवच्छेदकतावच्छेदकं त्ववच्छेदकांशे विशेष
णाभावापन्नमेवेति तु बोध्यम्‌ विषयताविषयभेदेनाननुगतानां विषयतानामनुग
मकं विषयतात्वमप्यतिरिक्तमास्थेयम्‌ अन्यथा घटो ज्ञानविषयः पटो ज्ञानविषय इत्या
कारिकायाः अनुगतप्रतीतेरनुपपत्तेः घटत्वादिविशिष्टबुद्धित्वावच्छिन्नं प्रति घटत्वादि
विषयताकज्ञानत्वादिना हेतुत्वानुपपत्तेश्च घटत्वाद्येकैकविषयह्नि विषयतानामेक
प्रकारताविशेष्यतादिभेदेन नानाविधतया कारणतावच्छेदकताननुगमे व्यभिचारप्र
संगात्‌ एवं विषयतात्ववान्‌दवांतरप्रकारतात्वविशेष्यतात्वादिकमप्यनुगतप्रतीतिवला

विष॰ वा॰

६

6

दतिरिक्तमनुपगंतव्यम् अत एव पर्वतत्वाद्यवच्छिन्नविशेष्यकवह्न्याद्यनुमितित्वावच्छि-
न्नं प्रति पर्वतत्वाद्यवच्छिन्नविशेष्यतानिरूपितवह्निव्याप्यधूमादिप्रकारताशालिज्ञान-
त्वादिनानुगतहेतुत्वकल्पनमुपपद्यते अन्यथा तत्तद्धूमादिभेदभिन्नानां प्रकारत्वादी-
नामननुगमेन तदनुपपत्तेः प्रकारतात्वं विशेष्यतात्वं च मिथो विरुद्धं घटवद्भूतल-
मित्यादिज्ञाने घटत्वादिप्रकारतानिरूपितघटादिनिष्ठविशेष्यताया एव भूतलादिनि- राम
ष्ठविशेष्यतानिरूपितप्रकारतानिरूपितया तत्र विशेष्यतात्वप्रकारतात्वयोः समावे- ६
शे शात् तच्च तादृशप्रकारताविशेष्यतयोर्भेदे घटवद्भूतलं द्रव्यं च द्रव्यवद्भूतलं घटश्चेति

ज्ञानयोर्वैलक्षण्यानुपपत्तेः उभयत्रैव घटत्वप्रकारतानिरूपिताया द्रव्यत्वप्रकारतानि
रूपितायाश्च घटविशेष्यताया घटप्रकारतानिरूपिताया भूतलविशेष्यतायाश्च सत्वात् म
न्मते च प्रथमे घटत्वप्रकारतानिरूपिता घटविशेष्यता भूतलनिष्ठविशेष्यतानिरूपितप्र
कारताभिन्ना द्रव्यत्वप्रकारतानिरूपितविशेष्यता च तद्भिन्ना द्वितीये च द्रव्यत्वप्रकारतानि
रूपितघटनिष्ठविशेष्यता भूतलनिष्ठविशेष्यतानिरूपितप्रकारताभिन्ना घटत्वप्रकार
तानिरूपितविशेष्यता च तद्भिन्नेति वैलक्षण्योपपत्तेः एवं रक्तदंडवान्पुरुष इत्यादिज्ञाने
रक्तत्वप्रकारतानिरूपितदंडत्वावच्छिन्नविशेष्यतैव पुरुषविशेष्यतानिरूपितप्रकार
तात एव च रक्तो दंडो दंडवान्पुरुष इत्यादिसमूहालंबनात् दृशविशिष्टबुद्धेर्वैलक्षण्यानु

विष.वा
७
7

पपत्तेः उभयत्रैव रक्तत्वप्रकारतानिरूपितदंडविशेष्यतायाः दंडप्रकारतानिरूपितपुरुषवि
शेष्यतायाश्च सत्वादिति केचित्तु विशेष्यताप्रकारतावदुद्देश्यत्वविधेयत्वे अपि विषयता
विशेषौ न च किंचिद्धर्मावच्छिन्नविशेष्यत्वमेवोद्देश्यत्वं तादृशविशेष्यतानिरूपितप्र-
कारत्वमेव विधेयत्वमस्तु किं तयोरतिरिक्तस्वीकारेणेति वाच्यम् तथा सति वह्निमान्पर्व
तो घटवानित्यादिबोधस्यापि पर्वतत्वावच्छिन्नोद्देश्यतानिरूपितवह्न्यादिविधेयता
शालित्वात्पर्वतो वह्निमानित्याकारकानुमित्यनंतरमिव तादृशानुमित्यनंतरमपि पर्वते व राम ७
ह्निमनुमिनोमीत्याकारकानुव्यवसायापत्तेः मन्मते तादृशज्ञानमाहार्यायाः पर्वतादिविशेष्य
तानिरूपितप्रकारताविलक्षणायाः पर्वतादिनिष्ठोद्देश्यतानिरूपितवह्न्यादिविधेयता

वह्निमान्पर्वतो घटवानित्यत्र २

याएवतादृशानुव्यवसायविषयत्वाभ्युपगमात् नत्वतदभावादेवतादृशानुव्यवसायाप
त्त्यसंभवात् अथपर्वतविशेष्यकवह्निप्रकारकानुमितित्वमेवतादृशानुव्यवसायविष
यः विषयतासंबंधेनतादृशानुव्यवसायंप्रतिचपर्वतविशेष्यकवह्निव्याप्यवत्ताज्ञान
जन्यानुमितित्वेनतादात्म्यप्रत्यासत्त्याहेतुत्वोपगमान्नवह्निमान्पर्वतोघटवानित्याकार
कानुमित्यनंतरंतथाविधानुव्यवसायापत्तिरितिकिमतिरिक्तविधेयतया नचतादृशानु
रूधर्म्मावच्छिन्नस्यतथाविधानुव्यवसायहेतुत्वकल्पनापेक्षयापर्वतविशेष्यतानिरू
पितवह्निविधेयताकानुमितित्वेनतद्धेतुत्वकल्पनेलाघवादतिरिक्तविधेयतासेत्स्यती

विम·वा
८
8

त्तिवाच्यम् लाघवमात्रेणातिरिक्तविधेयतासिद्धौ धूमादिपरामर्शजन्यतावच्छेदकतयापि
विलक्षणविषयतासिद्धिप्रसंगात् हेतुमद्विषयतायास्तज्जन्यतावच्छेदकत्वे तस्या आलोका
दिलिंगकानुमितिसाधारणतया तत्र व्यभिचारवारणायाव्यवहितोत्तरत्वस्य कार्यतावच्छेद
ककोटिप्रवेशेऽतीव गौरवात् अथातिरिक्तविषयतानभ्युपगमे सिद्ध्यभावजन्यतावच्छेदकं
दुर्वचम् तथा हि पर्वतो वह्निमानित्यादिसिद्ध्यभावजन्यतावच्छेदकं न पर्वतत्वावच्छिन्न
विशेष्यतानिरूपितवह्निसाप्यवेशाभावानजन्मानुमितित्वं वह्निमाप्यवासर्वतो प्रकारका
नुमितित्वं वह्निमान्पर्वतो घटवानित्येतादृशानुमितौ व्यभिचारात् नापि पर्वतत्वावच्छिन्न

राम
८

विशेष्यतानिरूपितवह्निव्याप्यवत्ताज्ञानजन्यानुमितित्वं वह्निव्याप्यवान्पर्वतो घटव्याप्यवां
श्चेत्याद्याकारकसमूहालंबनजन्यायां तथाविधानुमितौ व्यभिचारादिति चेन्न वह्नित्वान्यध·
र्मावच्छिन्नप्रकारत्वानिरूपितपर्वतत्वावच्छिन्नविशेष्यताकानुमितित्वस्यैव पर्वतो वह्नि
मानित्येतादृशासिद्धभावजन्यतावच्छेदकत्वस्वीकारात् वह्निमान्पर्वतो घटवानित्याद्याकार
कानुमितिविशेष्यतायां वह्नित्वान्यघटत्वावच्छिन्नप्रकारतानिरूपितत्वेन व्यभिचारानव
काशात् न चैवमपि वह्निमान्पर्वतवान्देशः इत्याद्याकारकानुमितौ व्यभिचारो दुर्वार एव तादृशा
नुमितिविशेष्यतायां वह्नित्वान्यधर्मावच्छिन्नप्रकारत्वाऽनिरूपितत्वादिति वाच्यम् ता
दृशमुख्यविशेष्यताया एव निवेशनीयत्वात् न चैवं तदपेक्षया पर्वतत्वावच्छिन्नोद्देश्यतानि

9

रूपितवह्नित्वावच्छिन्नविधेयतायास्तादृशानुमित्यभावजन्यतावच्छेदकत्वे लाघवा
न्नसिद्धिरिति वाच्यं लाघवेनातिरिक्तविषयताया: प्रागेव निरस्तत्वादिति चेन्न अ
तिरिक्तविषयतानभ्युपगमे वह्निं नानुमिनोमीति प्रतीतेरनुमितिनिष्ठो वह्निप्रकार
कत्वाभाव: आत्मनिष्ठो वह्निप्रकारकानुमितित्वावच्छिन्नाभावो वा विषयो वाम:
तथाच वह्निमान्पर्वतो घटवान्वह्निमत्पर्वतवान्देशाद्युमाद्यनुमितिकाले तथाप्रतीत्य राम
नुदयप्रसंग: तादृशानुमितौ वह्निप्रकारकत्वाभावस्यात्मनि च तथाविधानुमिति
त्वावच्छिन्नाभावस्यासत्वात् मम तु वह्निविधेयकत्वाभावस्यानुमितौ वह्निविधेय

कानुमितित्वावच्छिन्नं प्रत्यभावस्यानमनिताद्दशप्रतीतिविषयत्वोपगमान्तानुपपत्तिः
नचतदानींअमहेवैवताद्दशप्रतीतिरुत्पद्यतेतत्रचविषयासत्वमपिकिंचित्करमितिवा
च्यं यथाकथंचित्समात्वस्यशक्योपपादनत्वेनप्रतीतेर्भ्रमत्वकल्पनायाअन्याय्यत्वात्
नचवह्निमान्पर्वतइत्याज्ञानजन्यानुमितित्वावच्छिन्नाभावस्यैवतद्विषयत्वोपगमात्
ताद्दशानुमितेरज्ञानप्यात्वात् अतिरिक्तविधेयत्वानभ्युपगमेपिनतथाविधानुमित्य
नंतरमपितथाविधप्रत्ययानुपपत्तिरितिवाच्यम् तथासतिपिपक्षवैज्ञसमूहालंबन
जन्यतथाविधानुमित्यनंतरंतथाविधप्रतीत्यनुपपत्तितादवस्थ्यात् अनुमितिप

विष०वा० १०

10

रामर्शयोः कार्य्यकारणभावाग्रहदशायामपि तादृशपरामर्शस्य सर्वानुभवसिद्धत्वात्तादृशाभा
वस्य तद्विषयत्वासंभवाच्च अथैवमपि विधेयत्वमेवातिरिक्तमास्ताम् उद्देश्यत्वं तु विशेष्यत्व
रूपमेवास्तु किं च विधेयतावद्विधेयतात्वमप्यतिरिक्तमवश्यं स्वीकरणीयं अन्यथा वि
धेयतानां नानाविधेयादिभेदेन भिन्नतया नानुगमात् तद्विघटितोपदर्शितधर्मावच्छिन्न
प्रतियोगिताकाभावस्यैकस्यासंभवात् तावदभावकूटस्य दुर्ग्रहतया तादृशप्रतीत्यनुपपत्ति
तादवस्थ्यात् तथा चातिरिक्तविधेयतादिकल्पनमनर्थकम् पर्वतो वह्निमानित्यापा राम १०
कारकप्रत्यक्षादिसाधारणवह्न्यादिप्रकारतया विधेयतात्वस्वीकारेणैवोपपत्तेः न च तादृश

प्रत्यक्षादिसाधारणवह्न्यादिप्रकारतातो वह्निमान्पर्वतो घटवानित्यादिज्ञानीयप्रकार
ताभेदमानाभावाच्च विधेयतात्वस्वीकारे तथाविधानुमितिदशायां वह्निं नानु
मिनोमीत्यनुव्यवसायानुपपत्तिरितादवश्यमितिवाच्यम् वह्निमान्पर्वतो घटवा
नित्यादिज्ञानीयवह्न्यादिप्रकारताया घटादिप्रकारतानिरूपितपर्वतत्वावच्छिन्न
विशेष्यतानिरूपितत्तया पर्वतो वह्निमानित्येतादृशज्ञानीयवह्न्यादिप्रकारताया
श्चातथात्वेन तयोर्भेदस्यावश्यकत्वादितिचेन्नेवम् प्रकारतातिरिक्तविधेय-
तादेर्नामनभ्युपगमे पर्वते वह्निरित्यादिवाक्यजन्यशाब्दबोधस्य वह्न्यादिविधे

विष.वा.
११

पकत्वपर्वतोद्देश्यकत्वानुपपत्तेरिति दिक् विधेयतादिकल्पनमावश्यकमेव नचैत
त्रनास्त्येव पर्वतवह्न्योरुद्देश्यविधेयभावः किंतु विशेष्यविशेषणभावापन्नयोर्वह्निप
र्वतवृत्तित्वयोरेवेति वाच्यम् शाब्दबोधस्थले प्राङ्निर्दिष्टस्यैवोद्देश्यतया चरमनिर्दिष्ट
पदार्थस्यैव विधेयतया तादृशवाक्यजन्यशाब्दबोधे वह्निपर्वतवृत्तित्वयोरुद्देश्यविधे
यभावासंभवात् अन्यथा वह्निः पर्वते पर्वते वह्निरित्येतादृशवाक्यजन्यशाब्दबोधयो
र्विशेषणविशेष्यभावावैलक्षण्येन वैलक्षण्यानुपपत्तिः अत एव च गुणानां गुण राम ११
त्वमित्यत्र गुणत्वस्यैवोद्देश्यतावच्छेदकत्वं तस्यैव विधेयत्वमित्यभिप्रायेण या

यद्यत्तोद्देश्यतावच्छेदकविधेययोरैक्येन शाब्दबोधानुपपत्तिराशंकिता यदिव
विशेषणविशेष्यभावापन्नयोरुद्देश्यविधेयभावस्तदा तत्र गुणत्वत्वस्य विशेष्य
तावच्छेदकतया गुणहृत्तित्वस्य विशेषणतया गुणत्वस्य तथात्वेन तदसंगतासंग
तमेवस्मादिति एवं विधेयत्वादीनां प्रकारताविशेष्यतादिरूपत्वे इतरमापकीभूता
भावप्रतियोगिगंधवती पृथिवीत्वादिपरामर्शजन्यायाः पृथिव्यामितरभेद इत्या
द्याकारकसाध्यविशेष्यकानुमितेस्तद्विधेयकत्वानुपपत्त्यात इत्थमितरभेदंना
नुमिनोमीत्याद्यनुव्यवसायापत्तिः नचतादृशज्ञानीयेतरभेदविशेष्यतायामेव

विधेयतात्वोपगमान्नानादृशानुमितेरितरभेदादिविधेयकत्वानुपपत्तिरितिवाच्यं
विष-वा तथासतिपृथिवीमात्रवानितरभेदद्रव्याद्याकारकपरामर्शजन्यायाःऽआधेयतासंबं
१२ धेनपृथिव्यादिसाध्यकतथाविधानुमितेरपीतरभेदादिविधेयकत्वापत्तेः तथावि
12 धानुमितौविशेष्यतावैलक्षण्याभावादिति अथपर्वतेवह्निरित्यादिशाब्दबोधेपृथि
व्यामितरभेदद्रव्याद्यनुमितावतिरिक्तविधेयत्वादिसिद्धावपिपर्वतोवह्निमान् पृथि राम
वीतरभेदवतीत्याद्याकारकानुमित्यादौप्रकारत्वादतिरिक्तविधेयत्वादौमानाभावः १२
वह्न्यादिरूपैकैकप्रकारत्वादिनिरूपकीभूतानंतानुमित्यादिव्यक्तिष्वतिरिक्तवि

धेयतासंबंधकल्पनापेक्षयातादृशप्रकारत्वादेर्विधेयतात्वादिकल्पनाया एवोचितत्वा
दितिचेन्न प्रत्यक्षादिसाधारणप्रकारतायां विधेयतात्वांगीकारेऽनुमित्यादिस्थले वानुव्या
दीनां प्रतिबंधकतायामिच्छाधीनप्रत्यक्षे व्यभिचारवारणाय प्रत्यक्षान्यत्वस्य प्रतिबध्यताव
च्छेदककोटौ निवेशनीयतया गौरवप्रसंगात् मन्मते तु विधेयताया एव तादृशप्रतिबध्य
तावच्छेदककोटौ निवेशनीयतया तस्याश्च प्रत्यक्षसाधारणत्वानभ्युपगमेन नोक्तार्थप्रत्य
क्षे व्यभिचारविरहेण प्रत्यक्षान्यत्वस्यानिवेशात् न च परोक्षत्वजातेः प्रतिबध्यतावच्छेद
कत्वोपगमेनैवोक्तार्थप्रत्यक्षे व्यभिचारवारणसंभवेन मयापि प्रत्यक्षान्यत्वं न निवेश्यत

विष·वा·
१३
13

इतिवाच्यम् परोक्षत्वजातेरग्रे दूषितत्वात् अथ लाघवेनातिरिक्तविधेयतासिद्धेः
प्रागेव निरस्तत्वात्कथमेतादृशयुक्त्या तादृशानुमित्यादावतिरिक्तविधेयतासेत्स्यती
ति चेन्न एतादृशयुक्त्या एतादृशविधेयतानकल्प्यते किंतु पर्वते वह्निः पृथिव्यादीतर
भेदइत्याद्याकारकशाब्दानुमित्यादौ पूर्वोक्तयुक्त्यासिद्धस्य विधेयताविशेषस्य पर्वतो
वह्निमान् पृथिवीतरभेदवतीत्याद्याकारकानुमित्योरेकविधेयतास्वीकारे साध्यवि राम
शेष्यकानुमितौ साध्यसिद्धेः प्रतिबध्यतावच्छेदकं त्वं दुर्वचम् तथाहि इतर १३
भेदज्ञानस्य प्रतिबध्यतावच्छेदकं यदि इतरभेदविशेष्यकानुमितित्वं तदा इतर

भेदः पृथिवी आप्यवानित्यादिपरामर्शजन्येतरभेदपक्षकानुमितौ व्यभिचारः इत
रभेदविधेयकत्वे सति तद्विशेष्यकत्वानुमितित्वस्य प्रतिबध्यतावच्छेदकत्वे पि पृथि
वीतरभेदवतीतरभेदः पृथिवी आप्यवानित्याद्याकारकसमूहालंबनजन्यायां पृथि
वीतरभेदवतीदृतरभेदः पृथिवीवानिदृत्येतादृशसमूहालंबनानुमितौ व्यभिचारात्
तादृशानुमितेरितरभेदविधेयकत्वाभ्रद्विशेष्यकत्वाच्च मन्मते च तत्र प्रकारताभि
न्नेतरभेदविधेयतैवेतरभेदज्ञानप्रतिबध्यतावच्छेदिकेति न व्यभिचारः तादृशा
समूहालंबनानुमितिनिरूपितेतरभेदविधेयतायाः प्रकारतारूपतया तदन्यत्वा

विध.वा.
१४
15

भावादिति चेन्न इतरभेदविशेष्यकपरामर्शाजन्येतरभेदविशेष्यकानुमितित्वस्यैवमन्या
तेद्वितरभेदज्ञानप्रतिबध्यतावच्छेदकत्वोपगमात् पृथिवीत्वाप्यवानितरभेद इत्याद्या
कारकपरामर्शाजन्यानुमितेश्चेतरभेदविशेष्यकपरामर्शजन्यत्वेन व्यभिचारानव
काशात् नन्वेतादृशगुरुधर्मस्य साध्यसिद्धिप्रतिबध्यतावच्छेदकत्वे गौरवात् पृथिवी
तरभेदवतीत्याद्याकारकानुमितिनिरूपितप्रत्यक्षादिसामग्रीतरभेदादिप्रकार राम
तायां विधेयतात्वकल्पनमेवोचितमिति वाच्यं तथा सति धर्मितावच्छेदकभेदेना १४
न--धवुद्धादिप्रतिबंधकतायां प्रतिबध्यतावच्छेदककोटौ प्रत्यक्षान्यत्वनिवेशे

गौरवात् तदपेक्षयाधर्म्मिविशेषाक्षिप्तसाध्यप्रसिद्धिप्रतिबंधकतायां तादृशधर्मस्य
प्रतिबध्यतावच्छेदककोटिनिवेशनस्यौचित्यादिति एवमापत्तिस्थलेऽप्यापाद्यत्वमपि विष
यताविशेषः आपत्तिनिरूपितप्रकारतासामान्यस्यापाद्यत्वे वह्निमान्पर्वतो घटवान्स्यादि ३
घा त्याकारकापत्तावपि वह्न्यादेरापाद्यत्वापत्तिः पर्वतो वह्निमानित्याद्याकारकवह्न्याद्यनवच्छि
न्नविशेष्यताशालिज्ञानीयविलक्षणवह्न्यादिप्रकारतायास्तत्त्वोपगमेपि वह्निमान्पर्वतः
पर्वतो घटवान्स्यादित्याकारकापत्तौ वह्न्यादेस्तथात्वापत्तेर्दुर्वारत्वाच्च ननु स्वव्यतिरेक
निर्णयजन्यतदापत्तिविषयत्वमेव स्वस्य तदापत्तिनिरूपितमापाद्यत्वमस्तु किमतिरिक्तवि

विग्र·वा
१५
15

षयतास्वीकारे रोगः सम्भूतालंबनाद्यशो वघटव्यतिरेकनिर्णयस्यैवहेतुतयावह्न्यादेस्त
दापाद्यत्वासंभवादिति चेन्न तादृशव्यतिरेकनिर्णयजन्यत्वानुपस्थितावपि वह्न्यादिनि
ष्ठापाद्यत्वावगाहिनो वह्निमापादयामीत्याद्यनुव्यवसायस्यानुभवसाधततयाऽऽपाद्यत्व
स्यस्वव्यतिरेकनिर्णयजन्यतदापत्तिविषयत्वरूपत्वासंभवात् अथ वह्न्यादिप्रकारको
पत्तित्वमेव तादृशानुव्यवसायविषयः तादृशधर्मप्रकारतानिरूपितविषयतासंबंधे राम
न तादृशग्रहस्यनुव्यवसायं प्रति च वह्न्यभाववत्तानिर्णयजन्यतायां तादृशापत्तितादात्म्यत १५
याहेतुत्वान्नोपदर्शितसम्भूतालंबनाद्यनंतरं तादृशानुव्यवसायप्रसंगः आपत्तित्वं च मा

न सत्त्वव्याप्यजातिविशेषो वह्निमापादयामीत्यनुव्यवसायसाक्षिक एव न चातिरिक्तवि
षयताया अनभ्युपगमे वह्न्यादिव्याप्यवत्तानिर्णयादिजन्यतावच्छेदकं वह्न्यादिप्रकारकाप
त्तित्वमेव वाच्यं तथा च तादृशसमूहालंबनापत्त्या दोषो व्यभिचार इति वाच्यम् अनुमितिस्थानी
यकार्यकारणभावद्वयकारणवैशिष्ट्यनिवेशेन व्यभिचारस्य वारणीयत्वात् भवन्मतेप्य
न्यापादकापत्तौ व्यभिचारवारणाय वैशिष्ट्यनिवेशस्यावश्यकत्वात् एवं वह्न्यभावादिम
त्तानिर्णयजन्यतावच्छेदककोटावपि तद्वैशिष्ट्यस्य निवेशनीयतया न तस्य समूहालंबनाप
त्तौ व्यभिचारः भवन्मतेपि वह्निमद्भेदादिनिर्णयजन्यवह्न्यापादकापत्तौ व्यभिचारवारण

यत्तद्वैशिष्ट्यनिवेशस्यावश्यकत्वात् नच पर्वतत्वाद्यवच्छिन्नविशेष्यताकवह्न्यादिविशि
ष्टबुद्धौ पर्वतत्वाद्यवच्छिन्नविशेष्यकवह्न्यभावादिमत्तानिर्णयाभावे हेतुतायाः पर्वतो
16 वह्निमान्स्यादित्यापत्तेर्व्यभिचारवारणाय पर्वतत्वाद्यवच्छिन्नविशेष्यकवह्न्याद्यापाद
कापत्त्यन्यत्वं जन्यतावच्छेदककोटौ निवेश्यमिति तज्जन्यतावच्छेदककोटिप्रविष्टतयावि
षयताविशेषासिद्धिः वह्निप्रकारतापत्त्यन्यत्वस्य तत्र निवेशे वह्निमान्पर्वतः पर्वतो घ राम
टवान्स्यादित्यादिसमूहालंबनात्मकतादृशबोधदशायामापत्तेरिति वाच्यम् जन्यतासं १६
बंधेन वह्न्यभाववत्तानिर्णयवदन्यत्वस्यैव तत्र निवेशनीयतया व्यभिचारापत्त्योर्वार

रासंभवात् अन्यत्वनिवेशनापेक्षया विषयताविशेषनिवेशे लाघवात्तत्सिद्धिरिति
तुनवाच्यं कार्यतावच्छेदकादिलाघवेनातिरिक्तविषयतासिद्धौनत्तदापादकत्वस्याज्ञान
जन्यतावच्छेदकतयापि विषयताविशेषाणांसिद्धिप्रसंगात् वस्तुतस्तु बाधाभावजन्यता
वच्छेदककोटौ जन्यतासंबंधेन बाधवदन्यत्वस्य निवेशनमेवोचितं अन्यथा बाधका
लीच्छाधीनज्ञानेव्यभिचारवारणायेच्छामात्रोत्तेजकत्वे गौरवात् मन्मते आहार्यज्ञान
स्यापि बाधजन्यतयातस्यतादृशकार्यतावच्छेदकानाक्रांतत्वेन व्यभिचाराभावेनेच्छा
यात्रोत्तेजकानभ्युपगमात् न च बाधकालीनेच्छाधीनज्ञाने बाधहेतुतायामप्रामाणिकत

विध-रा
१७
17

यास्तदनुरोधेनतत्कल्पनेचगौरवात् इच्छायाउत्तेजकत्वमावश्यकमितिवाच्यम् आप
त्तिस्थलेबाधबुद्धेस्तत्तुतायाआवश्यकत्वात्तआपत्तित्वमनिवेश्येच्छाकालीनज्ञानसाधा
रणतादृशबाधाव्यवहितोत्तरज्ञानत्वस्यैवतज्जन्यतावच्छेदकत्वोपगमेनातिरिक्तकार
णतायाअकल्पनात् नचैवमापन्नमज्ञानस्यापिबाधकालेइच्छांविनापत्तिरितितत्रे
च्छायाहेतुत्वकल्पनेगौरवमितिवाच्यम् इच्छायाउत्तेजकत्वेप्रामाण्यग्रहाभावादिभिः राम
सममिच्छाभावस्यविशेषणविशेष्यभावेविनिगमनाविरहेणानंत्यादिच्छायाहेतुत्व १७
कल्पनस्यैवोचितत्वादितिचेन्नैवम् आपाद्यत्वरूपविषयताविशेषानभ्युपगमेज्ञा

ननिषेधवह्न्यादिप्रकारकोपस्थित्यभावश्चात्मनिष्ठस्तादृशापत्तित्वावच्छिन्नाभावो वा वह्निना
पादयामीत्यनुव्यवसायविषयो वाच्यः ननु वह्न्यादिव्यतिरेकनिर्णयजन्यत्वविशिष्टाप
त्त्याद्यभावः तादृशजन्यत्वान्यनुपस्थितिदशायामपि तादृशप्रतीतेः सर्वानुभवसिद्धत्वा
त् तथा च पूर्वोपदर्शितसमूहालंबनदशायां घटमापादयामि न वह्निमित्याद्यनुव्यवसाया
नुपपत्तिरिति तादृशविषयतास्वीकार आवश्यक इति एवं तादृशविषयतानिरूपकत्वमेवा
पत्तित्वं न तु जातिविशेषो मानाभावात् आपत्त्यन्यज्ञाने तादृशविलक्षणविषयत्वाभावा
देवापादयामीत्याद्यनुव्यवसायविरहोपपत्तिरिति ध्येयम् अत्रेदमवधेयं विधेयत्वमेवा
पत्तौ स्वीक्रियते तथा चापत्तिनिरूपितविधेयत्वमेवापाद्यत्वम् पर्वतो वह्निमान्घटवान्स्या

18

दित्वाकारकापत्तौ च घटस्यैव विधेयत्वमुपगम्यते नतु वह्नेरतो न तादृशापत्त्यनंतरं घटमापा
दयामि न वह्निमित्याद्याकारकानुव्यवसायानुपपत्तिः विधेयताया अनुमितिसाधारणोप
पित्वत्रापत्तित्वाख्यजातिविशेषाभावान्न तदनंतरमापादयामीत्यनुव्यवसायः आपत्ति अनुमित्यनंतरं २
त्वजातौ मानाभाव इति तु न वाच्यम् आपादयामीत्याद्यनुव्यवसायस्यैव मानत्वात् न च ताद
शानुव्यवसायस्य विधेयताविशेषविषयकत्वेनाप्युपपत्तेर्जातिविशेषविषयकत्वे विवाद
इति वाच्यं विषयभेदेनानंतविषयताकल्पनापेक्षया तादृशजातिकल्पने लाघवस्यैव वि राम
वादभंजकत्वात् न च भवन्मते बाधबुद्धिप्रतिबध्यतावच्छेदककोटौ तद्विधेयकजातीय १८
ज्ञानभिन्नत्वं निवेश्यं तद्विधेयकान्यत्वनिवेशेऽनुमित्याद्यसंग्रहापत्तेः ममतु तन्निष्ठवि

अनुमित्यादेस्तद्विधेयकत्वाभावात् १
प्रतिबध्यतावच्छेदककोटौ १

19

लक्षणाविषयताकान्यत्वमेवनिवेश्यमितिवाच्यम् इच्छाधीनज्ञानेव्यभिचारवारणाये
च्छायाउत्तेजकत्वकल्पनापेक्षयालाघवेनजन्यतासंबंधेनबाधवदन्यत्वस्यैवनिवेशि
तत्वात्तेनैवापत्तावपिव्यभिचारस्यवारणात् तदन्यत्वस्यैवनिवेशात् कार्य्यतावच्छेद
कादिलाघवेनातिरिक्तविषयतासिद्धिः प्रतिबंदिसहस्रकवलितत्वाच्च एतेनानु·
मित्यादिसाधारणेन तत्स्थानीयप्रतिबंधकतायां प्रतिबध्यतावच्छेदककोटौ प्रत्यक्षा
न्यत्वंचनिवेशनीयमितिगौरवमित्यपिपरास्तमितिहृतंपल्लवितेन इतिविषयतावा राम १८
दार्थस्समाप्तः संवत् १८८८ शुद्धवैशाखशुक्ल १० दशम्यांनृसिंहपुष्करक्षेत्रेमवच्छमे
नलिखितंपठितंचेति श्रीनृहरिपदारविंदमकरंदरसांतःकरणामलेनाशयत्वविधाजम्

पत्रे १८

घटवद्भूतलं पटवच्चेति समूहालम्बनज्ञाने घटत्वावच्छिन्नप्रकारतानिरूपितसंयोगात्मिकसांसर्गिकविषयतावच्छिन्न
विशेष्यताशालिभूतले पटत्वावच्छिन्नप्रकारतानिरूपितसंयोगात्मिकसांसर्गिकविषयतावच्छिन्नविशेष्यता
शालिभूतलमिति विषयताबोधः १ घटवद्भूतलं पटवदिति नैकत्र द्वयमिति रीत्या घटत्वावच्छिन्नप्रकारतानिरूपित
संयोगसांसर्गिकविषयतावच्छिन्नविशेष्यताशालि पटत्वावच्छिन्नप्रकारतानिरूपितसंयोगसांसर्गिकविषयतावच्छि
न्नविशेष्यताशालिभूतलमिति बोधः १ + घटवद्भूतलमित्यादिज्ञानं विशिष्टवैशिष्ट्यावगाहि २
भूतलं घटवदिति ज्ञानमेकविशेषणविशिष्टेऽपरवैशिष्ट्यावगाहि १ घटवद्भूतलं भूतलत्ववत् घटवद्भूतलं पटवदित्यादिज्ञान
मेकत्र द्वयमिति रीत्या एकस्मिन् धर्मिणि नानाधर्मवैशिष्ट्यावगाहि २ विशेष्ये विशेषणं तत्र च विशेषणान्तरमिति रीत्यापि भूतलघ
टघटत्वावगाहि घटवद्भूतलमिति ज्ञानम् ४ घटवद्भूतलं पटवच्च घटवान् सर्वतो घटवद्भूतलमित्यादिज्ञानं समूहालम्बनम् ५
भूतलं घटवदित्यत्र घटत्वावच्छिन्नसंयोगसंसर्गावच्छिन्नप्रकारतानिरूपिताऽभेदसंसर्गावच्छिन्नघटवन्निष्ठविशेष्यताभिन्नप्रकारता
निरूपितभूतलत्वावच्छिन्नविशेष्यताशालि भूतलम् । एकत्र द्वयमिति रीत्या तु घटत्वावच्छिन्नप्रकारतानिरूपितं संयोगात्मिकसांसर्गि
कविषयतावच्छिन्नप्रकारतानिरूपिताऽभेदसंसर्गावच्छिन्नघटवन्निष्ठ [redacted] विशेष्यताभिन्नप्रकारतानिरूपिता या
भूतलत्वनिष्ठसमवायसंबन्धावच्छिन्नप्रकारतानिरूपिता विशेष्यता तच्छालि भूतलम् ७

प॰ १

पत्रे ५८